# Lesson 41 C. श्रमः यस्य फलं तस्य ।

एकः ग्रामः अस्ति स्म । ग्रामं परितः वृक्षाः सन्ति स्म । तस्मिन् ग्रामे केचन (some) बालकाः वसन्ति स्म । ते अत्र तत्र क्रीडन्ति स्म । तेषु एकः शेखरः। एकदा क्रीडासमये सः एकस्मिन् आम्रवृक्षे आम्रफलानि अपश्यत् ।

सः अपृच्छत्....भोः तत्र आम्रफलानि सन्ति । कः वृक्षस्य आरोहणं करिष्यति , फलं च आनेष्यति ?

सर्वे बालकाः अवदन्.... वयं वृक्षस्य आरोहणं न करिष्यामः । वयं फलानि न आनेष्यामः।

शेखरः वृक्षम् आरोहत् , फलानि च आनयत् ।

सः पुनः अपृच्छत्.....कः छुरिकाम् ( knife) आनेष्यति ?

सर्वे बालकाः अवदन्.... वयं न आनेष्यामः।

शेखरः छुरिकाम् आनयत् ।सः पुनः च अपृच्छत् ... कः आम्रफलस्य ( mango's) त्वचस्य ( skin's) निष्कासनं ( removal) करिष्यति ?

सर्वे बालकाः अवदन्.... वयं न आम्रफलस्य त्वचस्य निष्कासनं करिष्यामः।

शेखरः एव त्वचं निष्कासयत् ।

सः पुनः अपृच्छत्..... एतस्य शकलानि ( pieces) कः अपि करिष्यति किम् ?

सर्वे बालकाः अवदन्... भवान् एव करोतु । वयं तु एतस्य शकलानि न कर्तुम् इच्छामः ।

शेखरः स्वयम् अकर्तयत् ( cut) ।

अन्ते सः अन्तिमं प्रश्नम् अपृच्छत्..... आम्रफलशकलानि कः खादिष्यति ?

अहं खादिष्यामि !! अहं खादिष्यामि !!इति प्रत्येकः बालकः अवदत् शेखरं प्रति अधावत् च ।

शेखरः अवदत्....तिष्ठन्तु, तिष्ठन्तु। त्वरा मास्तु ( Do not make haste)। शृण्वन्तु । अहम् आम्रफलम् अपश्यम् ।अहं छुरिकाम् आनयम् । अहं तस्य त्वचस्य निष्कासनम् अकरवम् । अहं तस्य शकलानि अकरवम् । अतः अहम् एव खादिष्यामि ।

*********